# Shri Brahmastra Mahavidya Bagulamukhi Stotram

# શ્રીબ્રહ્માસ્ત્રમહાવિદ્યાબગલામુખીસ્તોત્રમ્

## Document Information

Text title : Brahmastra Mahavidya Bagalamukhi Stotram

File name : brahmAstramahAvidyAbagalAmukhIstotram.itx

Category : devii, dashamahAvidyA

Location : doc_devii

Proofread by : Ruma Dewan

Latest update : March 11, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીબ્રહ્માસ્ત્રમહાવિદ્યાબગલામુખીસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
ૐ અસ્ય શ્રીબગલામુખીસ્તોત્રસ્ય ભગવાન્ નારદ ઋષિઃ ।
ત્રિષ્ટુપ્છન્દઃ । શ્રીબગુલામુખી દેવતા ।
હ્લીં બીજમ્ । સ્વાહા શક્તિઃ ।
મમ સન્નિહિતાનામસન્નિહિતાનાં વિરોધિનાં દુષ્ટાનાં
વાઙ્મુખબુદ્ધીનાં સ્તમ્ભનાર્થે
શ્રીમહામાયાબગલામુખીવરપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ । (પાઠે વિનિયોગઃ)
કરન્યાસઃ ।
ૐ હ્લીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ બગલામુખી તર્જનીભ્યાં સ્વાહા ।
ૐ સર્વદુષ્ટાનાં મધ્યમાભ્યાં વષટ્ ।
ૐ વાચં મુખં પદં સ્તમ્ભય અનામિકાભ્યાં હુમ્ ।
ૐ જિહ્વાં કીલય કીલય કનિષ્ઠિકાભ્યાં વૌષટ્ ।
ૐ બુદ્ધિં વિનાશય હ્લીં ૐ સ્વાહા કરતલકરપૃષ્ઠાભ્યાં ફટ્ ॥

ઋષ્યાદિન્યાસઃ ।
ૐ નારદઋષયે નમઃ શિરસિ ।
ૐ ત્રિષ્ટુપ્ છન્દસે નમઃ મુખે ।
ૐ શ્રીબગલામુખીદેવતાયૈ નમઃ હૃદયે ।
ૐ હ્લીં બીજાય નમઃ ગુહ્યે ।
ૐ સ્વાહા શક્તયે નમઃ પાદયોઃ ।
ૐ વિનિયોગાય નમઃ સર્વાઙ્ગે ।
ઇતિ ઋષ્યાદિન્યાસઃ ॥

હૃદયાદિષડઙ્ગન્યાસઃ ।
ૐ હ્લીં હૃદયાય નમઃ ।
ૐ બગલામુખી શિરસે સ્વાહા ।

ॐ સર્વદુષ્ટાનાં શિખાયૈ વષટ્ ।
ॐ વાચં મુખં સ્તમ્ભય કવચાય હુમ્ ।
ॐ જિહ્વાં કીલય કીલય નેત્રત્રયાય વૌષટ્ ।
ॐ બુદ્ધિં વિનાશય હ્લીં ॐ સ્વાહા અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ।
ॐ હ્લીં ક્લીં ઐં ઇતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનં -
સૌવર્ણાસનસંસ્થિતાં ત્રિનયનાં પીતાંશુકોલ્લાસિનીં
    હેમાભાઙ્ગરુચિં શશાઙ્કમુકુટાં સચ્ચમ્પકસ્રગ્યુતામ્ ।
હસ્તૈર્મુદ્ગરપાશવજ્રરસનાઃ સમ્બિભ્રતીં ભૂષણૈઃ
    વ્યાપ્તાઙ્ગીં બગલામુખીં ત્રિજગતાં સંસ્તમ્ભિનીં ચિન્તયેત્ ॥

જપમન્ત્રઃ -
ॐ હ્લીં બગલામુખિં સર્વદુષ્ટાનાં વાચં મુખં પદં સ્તમ્ભય
જિહ્વાં કીલય બુદ્ધિં વિનાશય હ્લીં ॐ સ્વાહા ।
અથ સ્તોત્રં -
મધ્યેસુધાબ્ધિ મણિમણ્ડપરત્નવેદ્યાં
    સિંહાસનોપરિગતાં પરિપીતવર્ણામ્ ।
પીતામ્બરાભરણમાલ્યવિભૂષિતાઙ્ગીં
    દેવીં નમામિ ધૃતમુદ્ગરવૈરિજિહ્વામ્ ॥ ૧॥

જિહ્વાગ્રમાદાય કરેણ દેવીં વામેન શત્રૂન્ પરિપીડયન્તીમ્ ।
ગદાભિધાતેન ચ દક્ષિણેન પીતામ્બરાઢ્યાં દ્વિભુજાં નમામિ ॥ ૨॥

ત્રિશૂલધારિણીમમ્બાં સર્વસૌભાગ્યદાયિનીમ્ ।
સર્વશૃઙ્ગારવેશાઢ્યાં દેવીં ધ્યાત્વા પ્રપૂજયેત્ ॥ ૩॥

પીતવસ્ત્રાં ત્રિનેત્રાં ચ દ્વિભુજાં હાટકોજ્જ્વલામ્ ।
શિલાપર્વતહસ્તાં ચ સ્મરેત્ તાં બગલામુખીમ્ ॥ ૪॥

રિપુજિહ્વાગ્રહાં દેવીં પીતપુષ્પવિભૂષિતામ્ ।
વૈરિનિર્દલનાર્થાય સ્મરેત્તાં બગલામુખીમ્ ॥ ૫॥

ગમ્ભીરાં ચ મદોન્મત્તાં સ્વર્ણકાન્તિસમપ્રભામ્ ।
ચતુર્ભુજાં ત્રિનેત્રાં ચ કમલાસનસંસ્થિતામ્ ॥ ૬॥

મુદ્ગરં દક્ષિણે પાશં વામે જિહ્વાં ચ વજ્રકમ્ ।
પીતામ્બરધરાં સાન્દ્રદૃઢ઼પીનપયોધરામ્ ॥ ૭॥

હેમકુણ્ડલભૂષાં ચ પીતચન્દ્રાર્ધશેખરામ્ ।
પીતભૂષણપીતાઙ્ગીં સ્વર્ણસિંહાસને સ્થિતામ્ ॥ ૮॥

એવં ધ્યાત્વા જપેત્ સ્તોત્રમેકાગ્રકૃતમાનસઃ ।
સર્વસિદ્ધિમવાપ્નોતિ મન્ત્રધ્યાનપુરઃસરમ્ ॥ ૯॥

આરાધ્યા જગદમ્બ દિવ્યકવિભિઃ સામાજિકૈઃ સ્તોતૃભિઃ
માલ્યૈશ્ચન્દનકુઙ્કુમૈઃ પરિમલૈરભ્યર્ચિતા સાદરાત્ ।
સમ્યઙ્ન્યાસિસમસ્તભૂત નિવહે સૌભાગ્યશોભાપ્રદે
શ્રીમુગ્ધે બગલે પ્રસીદ વિમલે દુઃખાપહે પાહિ મામ્ ॥ ૧૦॥

આનન્દકારિણી દેવી રિપુસ્તમ્ભનકારિણી ।
મદનોન્માદિની ચૈવ પ્રીતિસ્તમ્ભનકારિણી ॥ ૧૧॥

મહાવિદ્યા મહામાયા સાધકસ્ય ફલપ્રદા ।
યસ્યાઃ સ્મરણમાત્રેણ ત્રૈલોક્યં સ્તમ્ભયેત્ક્ષણાત્ ॥ ૧૨॥

વામે પાશાઙ્કુશૌ શક્તિ તસ્યાધસ્તાદ્વરં શુભમ્ ।
દક્ષિણે ક્રમતો વજ્રં ગદાજિહ્વાઽભયાનિ ચ ॥ ૧૩॥

વિભ્રતીં સંસ્મરેન્નિત્યં પીતમાલ્યાનુલેપનામ્ ।
પીતામ્બરધરાં દેવીં બ્રહ્માદિસુરવન્દિતામ્ ॥ ૧૪॥

કેયૂરાઙ્ગદકુણ્ડલભૂષાં બાલાર્કદ્યુતિરઞ્જિતવેષામ્ ।
તરુણાદિત્યસમાનપ્રતિમાં કૌશેયાંશુકબદ્ધનિતમ્બામ્ ॥ ૧૫॥

કલ્પદ્રુમતલનિહિતશિલાયાં પ્રમુદિતચિત્તોલ્લસદલકાન્તામ્ ।
પઞ્ચપ્રેતનિકેતનબદ્ધાં ભક્તજનેભ્યો વિતરણશીલામ્ ॥ ૧૬॥

એવંવિધાં તાં બગલાં ધ્યાત્વા મનસિ સાધકઃ ।
સર્વસમ્પત્સમૃદ્ધ્યર્થં સ્તોત્રમેતદુદીરયેત્ ॥ ૧૭॥

ચલત્કનકકુણ્ડલોલ્લસિતચારુગણ્ડસ્થલાં
લસત્કનકચમ્પકદ્યુતિમદિન્દુબિમ્બાનનામ્ ।
ગદાહતવિપક્ષકાં કલિતલોલજિહ્વાં ચલાં
સ્મરામિ બગલામુખી વિમુખવાઙ્મુખસ્તમ્ભિનીમ્ ॥ ૧૮॥

પીયૂષોદધિમધ્યચારુવિલસદ્રત્નોજ્જ્વલે મણ્ડપે
    તત્સિંહાસનમૂલપાતિતરિપું પ્રેતાસનાધ્યાસિનીમ્ ।
સ્વર્ણાભાં કરપીડિતારિરસનાં ભ્રામ્યદ્ગદાં વિભ્રમાં
    યસ્ત્વાં ધ્યાયતિ યાન્તિ તસ્ય વિલયં સદ્યોઽથ સર્વાપદઃ ॥ ૧૯॥

દેવિ ત્વચ્ચરણામ્બુજાર્ચનકૃતે યઃ પીતપુષ્પાઞ્જલિં
    મુદ્રાં વામકરે નિધાય ચ પુનર્મન્ત્રી મનોજ્ઞાક્ષરમ્ ।
પીતાધ્યાનપરોઽથ કુમ્ભકવશાદ્ બીજં સ્મરેત્પાર્થિવ
    તસ્યામિત્રમુખસ્ય વાચિ હૃદયે જાડ્યં ભવેત્ તત્ક્ષણાત્ ॥ ૨૦॥

મન્ત્રસ્તાવદલં વિપક્ષદલને સ્તોત્રં પવિત્રં ચ તે
    યન્ત્રં વાદિનિયન્ત્રણે ત્રિજગતાં જૈત્રં ન ચિત્રં હિ તત્ ।
માતઃ શ્રીબગલેતિ નામ લલિતં યસ્યાસ્તિ જન્તોર્મુખે
    તન્નામસ્મરણેન સંસદિ મુખસ્તમ્ભો ભવેદ્વાદિનામ્ ॥ ૨૧॥

વાદી મૂકતિ રઙ્કતિ ક્ષિતિપતિર્વૈશ્વાનરઃ શીતતિ
    ક્રોધી શામ્યતિ દુર્જનઃ સુજનતિ ક્ષિપ્રાનુગઃ ખઞ્જતિ ।
ગર્વી ખર્બતિ સર્વવિચ્ચ જડતિ ત્વદ્યન્ત્રણાયન્ત્રિતઃ
    શ્રીનિત્યે બગલામુખિ પ્રતિદિનં કલ્યાણિ તુભ્યં નમઃ ॥ ૨૨॥

દુષ્ટસ્તમ્ભનમુગ્રવિઘ્નશમનં દારિદ્ર્યવિદ્રાવણં
    ભૂભૃત્સન્નમનં ચ યન્મૃગદૃશાં ચેતઃસમાકર્ષણમ્ ।
સૌભાગ્યૈકનિકેતનં સમદૃશાં કારુણ્યપૂર્ણેક્ષણે
    શત્રોર્મારણમાવિરસ્તુ પુરતો માતસ્ત્વદીયં વપુઃ ॥ ૨૩॥

માતર્ભઞ્જય મદ્વિપક્ષવદનં જિહ્વાં ચ સઙ્કીલય
    બ્રાહ્મીં યન્ત્રય મુદ્રયાશુ ધિષણામુગ્રાં ગતિં સ્તમ્ભય ।
શત્રૂંશ્ચૂર્ણય ચૂર્ણયાશુ ગદયા ગૌરાઙ્ગિ પીતામ્બરે
    વિઘ્નૌઘં બગલે હર પ્રણમતાં કારુણ્યપૂર્ણેક્ષણે ॥ ૨૪॥

માતર્ભૈરવિ ભદ્રકાલિ વિજયે વારાહિ વિશ્વાશ્રયે
    શ્રીવિદ્યે સમયે મહેશિ બગલે કામેશિ વામે રમે ।
માતઙ્ગિ ત્રિપુરે પરાત્પરતરે સ્વર્ગાપવર્ગપ્રદે
    દાસોઽહં શરણાગતોઽસ્મિ કૃપયા વિશ્વેશ્વરિ ત્રાહિ મામ્ ॥ ૨૫॥

ત્વં વિદ્યા પરમા ત્રિલોકજનની વિઘ્નૌઘવિધ્વંસિની
    યોષાકર્ષણકારિણી ત્રિજગતામાનન્દસંવર્ધિની ।

દુષ્ટોચ્ચાટનકારિણી પશુમનઃ સમ્મોહસન્દાયિની
    જિહ્વાઃ કીલય વૈરિણાં વિજયસે બ્રહ્માસ્ત્રાવિદ્યા પરા ॥ ૨૬॥

માતર્યસ્તુ મનોરમં સ્તવમિમં દેવ્યાઃ પઠેત્સાદરં
    ધૃત્વા યન્ત્રમિદં તથૈવ સમરે બાહ્વોઃ કરે વા ગલે ।
રાજાનો વરયોષિતોઽથ કરિણઃ સર્પા મૃગેન્દ્રાઃ ખલા-
    સ્તે વૈ યાન્તિ વિમોહિતા રિપુગણા લક્ષ્મીઃ સ્થિરા સર્વદા ॥ ૨૭॥

અનુદિનમભિરામં સાધકો યસ્ત્રિકાલં
    પઠતિ સ ભુવનેઽસૌ પૂજ્યતે દેવવર્ગૈઃ ।
સકલમમલકૃત્યં તત્ત્વદ્રષ્ટા ચ લોકે
    ભવતિ પરમસિદ્ધા લોકમાતા પરામ્બા ॥ ૨૮॥

પીતવસ્ત્રવસનામરિદેહપ્રેતજાસનનિવેશિતદેહામ્ ।
ફુલ્લપુષ્પરવિલોચનરમ્યાં દૈત્યજાલદહનોજ્જ્વલભૂષામ્ ॥  ૨૯॥

પર્યઙ્કોપરિ લસદ્વિભુજાં કમ્બુહેમનતકુણ્ડલલોલામ્ ।
વૈરિનિર્દલનકારણરોષાં ચિન્તયામિ બગલાં હૃદયાબ્જે ॥ ૩૦॥

ચિન્તયામિ સુભુજાં શૃણિહસ્તાં સદ્ભુજાં ચ સુરવન્દિતચરણામ્ ।
ષષ્ઠિસપ્તતિશતૈર્ધૃતશસ્ત્રૈર્બાહુભિઃ પરિવૃતાં બગલામ્બામ્ ॥ ૩૧॥

ચૌરાણાં સઙ્કટે ચ પ્રહરણસમયે બન્ધને વારિમધ્યે
    વહ્નૌ વાદે વિવાદે પ્રકુપિતનૃપતૌ દિવ્યકાલે નિશાયામ્ ।
વશ્યે વા સ્તમ્ભને વા રિપુવધસમયે પ્રાણબાધે રણે વા
    ગચ્છંસ્તિષ્ઠંસ્ત્રિકાલં સ્તવપઠનમિદં કારયેદાશુ ધીરઃ ॥ ૩૨॥

વિદ્યા લક્ષ્મીઃ સર્વસૌભાગ્યમાયુઃ પુત્રાઃ સમ્પદ્રાજ્યમિષ્ટં ચ સિદ્ધિઃ ।
માતઃ શ્રેયઃ સર્વવશ્યત્વસિદ્ધિઃ પ્રાપ્તં સર્વં ભૂતલે ત્વત્પરેણ ॥ ૩૩॥

ગેહં નાકતિ ગર્વિતઃ પ્રણમતિ સ્ત્રીસઙ્ગમો મોક્ષતિ
    દ્વેષી મિત્રતિ પાતકં સુકૃતતિ ક્ષ્માવલ્લભો  દાસતિ ।
મૃત્યુર્વૈદ્યતિ દૂષણં ગુણતિ વૈ યત્પાદસંસેવનાત્
    તાં વન્દે ભવભીતિભઞ્જનકરીં ગૌરીં ગિરીશપ્રિયામ્ ॥ ૩૪॥

યત્કૃતં જપસન્ધ્યાનં ચિન્તનં પરમેશ્વરિ ।
શત્રૂણાં સ્તમ્ભનાર્થાય તદ્ગૃહાણ નમોઽસ્તુ તે ॥ ૩૫॥

બ્રહ્માસ્ત્રમેતદ્વિખ્યાતં ત્રિષુ લોકેષુ દુર્લભમ્ ।

ગુરુભક્તાય દાતવ્યં ન દેયં યસ્ય કસ્યચિત્ ॥ ૩૬॥

પીતામ્બરાં ચ દ્વિભુજાં ત્રિનેત્રાં ગાત્રકોજ્જ્વલામ્ ।
શિલામુદ્ગરહસ્તાં ચ સ્મરેત્ તાં બગલામુખીમ્ ॥ ૩૭॥

સિદ્ધિં સાધ્યેઽવગન્તું ગુરુવરવચનેષ્વાર્હવિશ્વાસભાજાં
  સ્વાન્તઃ પદ્માસનસ્થાં વરરુચિબગલાં ધ્યાયતાં તારતારમ્ ।
ગાયત્રીપૂતવાચાં હરિહરમનને તત્પરાણાં નરાણાં
  પ્રાતર્મધ્યાહ્નકાલે સ્તવપઠનમિદં કાર્યસિદ્ધિપ્રદં સ્યાત્ ॥ ૩૮॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરખણ્ડે શ્રીબ્રહ્માસ્ત્રમહાવિદ્યાબગલામુખીસ્તોત્રં સમ્પૂર્ણમ્ ।

The Panchanga Prakaranam has this stora as first:

(1) Brahmastramahavidyastotram

(2) Hridayam

(3) Panjara Stotram

(4) Panjara Nyasa Stotram

(5) Kavacham (5 kavachams are given)

See these stotras in Devi section.

Proofread by Ruma Dewan

---

*Shri Brahmastra Mahavidya Bagulamukhi Stotram*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*